तयोरिति अभिहिते कर्मणि प्रथमैव भवति यथा विष्णुना क्रियते लोकः अनभिहिते कर्मणि द्वितीया तृतीया चतुर्थी
षष्ठी चेति चतस्रो भवंति द्वितीया यथा ग्रामं गच्छति नरः तृतीया यथा पुत्रेण संजानीते पिता च० य० ग्रामाय व्रजते नरः
षष्ठी य० ग्रामस्य गंता देवदत्तः ५ सू० तृतीयाद्वयमी चैव षष्ठी करणे त्रिधा षष्ठी चतुर्थी तृतीया च संप्रदाने
तथा त्रिधा ६ टी० तृतीयेति करणे तृ० पंचमी षष्ठी चेति तिस्रो भवंति तृतीया यथा चक्रेणासुरं छिनत्ति हरिः
पं० य० हस्तान्मुक्तः षष्ठी य० चक्रस्य संजानीते मित्रं षष्ठीति संप्रदाने ष० च० तृतीया चेति तिस्रो भवंति ष
ष्ठी यथा पुरुषस्य गां ददाति सोमदत्तः च० य० क्षुधिताय अन्नं ददाति देवदत्तः तृ० य० दास्या माल्यं दिशति का
मुकः ६ सू० पंचमी खलु अपादाने वर्तते नान्यथा सप्तम्येवाधिकरणे कारकस्यैष संग्रहः ॥७॥
पंचमीति अपादाने पंचम्येव भवति नान्या यथा नीपाद्वनं राति कश्चित् सप्तमीति अधिकरणे सप्तम्ये
व भवति नान्या यथा व्रजे वसति कृष्णः ७ ६ इति कारक संक्षेपः समाप्तः ६ ॥ श्रीरस्तु०

ह० का० समासस्तद्धितस्तिङ् कृत्ते चत्वारो भिधा काः॥ तदेवा नभि सं बंधाद्वृत्त्यनभिधा

॥३॥ यकाः॥ ८ टी० अथसमासः समासेति ८ मू० षट् समासा श्च संक्षेपाद् ऽष्टाविंशतिधा पुनः ॥ नि

त्यानित्यत्वयोगेन लुगलुक्त्वे न च द्विधा ९ टी० षडिति समासः संक्षेपात षोढा पुनः अष्टाविंशतिधा

नित्यानित्यत्वभेदेन द्विविधो भवति लुगलुक्त्वे न च द्विविधो भवति तत्र नित्यसमासो यथा

प्रचुरोऽनित्योपधात्रास्मण कमलः लुक्समासः कष्टाश्रितः अलुक्समासः कंठेगुडः ॥९॥

मू० तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः सप्तधा च बहुव्रीहिर्द्विगुराभाषितो द्विधा १०

तत्राऽष्टधा तत्पुरुषः पूर्वः कायो यस्य स पूर्वकायः १ कष्टसमाश्रितः कष्टाश्रितः २ शंकुलया खं

डः प्रां कुलखंडः ३ कुंडलाय हिरण्यं कुंडलहिरण्यं ४ सिंहाद्भयं सिंहभयं ५ वृक्षस्य मूलं वृक्षमूलं ६

अदेषु शौंडः अक्षशौंडः ७ न ब्राह्मणः अब्राह्मणः ८ सप्तधा कर्मधारयः विशेषणपूर्वपदः १

विशेषणपूर्वपदः २ विशेषणोभयपदः ३ उपमानपूर्व० ४ उपमानोत्तरपदः ५ संभावनापूर्व० ६
अवधारणपूर्व० ७ इति विशेषणपूर्वपदो यथा नीलं च तदुत्पलं च नीलोत्पलं १ विशेषणपू० पाथे
वैयाकरणश्चासौ खसूचिश्च वैयाकरणखसूचिः २ विशेषणोभय० पीतं च तदुत्तं च पीतोत्तम् ३ उपमानपू० शंख इव पांडुः शंखपांडुः ४ उपमानोत्तर० पुरुषो व्याघ्र इव पुरुषव्याघ्रः ५
संभावनापू० गुड इव बुद्धिः गुडबुद्धिः ६ अवधारणपू० गुण एव धनं गुडधनं ७ सप्तधा च बहुव्रीहिः
द्विपदः १ बहुपादः २ संख्योत्तरपदः ३ संख्योभयपदः ४ सहपूर्वपदः ५ कर्मव्यतिहारः ६ दिगंतरालक्षणः ७ तत्र द्विपदो यथा आरूढो वानरो वृक्षं स आरूढवानरो वृक्षः १ निर्जितः कामो येन स निर्जितकामः २ उपनीतं भोजनं यस्मै स उपनीतभोजनो ब्राह्मणः ३ निष्क्रांतो भोजनो यस्मात् तं निष्क्रांतः भोजनं
नगरं ४ पीतं अंबरं यस्य स पीतांबरो हरिः ५ उसितो विभवो यस्मिन् स उसितविभवो ग्रामः ६ बहुपदो यथा परो कर्मेण उपार्जिताः संपदो येन स पराक्रमोपार्जितसंपदः २ संख्योत्तरपदो यथा उपदशा

ह्रा॰ का॰ नामिमे पुरुषाः पुपदस्याः ३ संख्योभयपदो यथा द्वौ त्रयो वा द्वित्राः ४ सरूपसर्वपदो यथा समस्तेन न उद्धृतः

॥५॥ समस्तो द्वन्द्वः ५ कर्मव्यतिहारे लक्षणो यथा केशेषु गृहीत्वा इदं युद्धं प्रवर्त्तते इति केशाकेशि मुसलम् ६ दिगंतराल

लक्षणो यथा दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदंतरालं सेयं दक्षिणपूर्वा दिक् ७ संख्यापूर्वो द्विगुः स च द्विविधः एकवद्

भावी अनेकवद्भावी चेति एकवद्भावी यथा त्रीणि शृंगाणि समाहृतानि त्रिशृंगं ८ त्रयाणां लोकानां समाहारः त्रि

लोकी ९ अने॰ त्रिलोकाः १० द्वं॰ द्वंद्वश्चतुर्विधो ह्ययो ऽव्ययीभावो द्विधा मतः ॥ तेषां पुनेनः समा

सानां प्राधान्यस्याच्चतुर्विधम् ११ द्वं द्वश्चतुर्विधः समुच्चयः अन्वाचयः समाहारः इतरेतर

योगश्चेति तत्र समुच्चयो यथा ऽन्वाचययोः समासो नास्ति समुच्चयो नास्ति यथा देवदत्तः पचति

यज्ञदत्तश्च अन्वाचयः यथा वटो भिक्षामट गां चानय समाहारः १२ दो यथा शंखश्च वटहश्च

शंखवटहं इतरेतरयोगो यथा रामश्च लक्षणश्च रा॰ मलक्ष्मणौ युधिष्ठिरश्च भीमश्चार्जुन॰